Total Pages—4

**PG/IIIS/SAN-303/19**

# MA 3rd Semester Examination, 2019

## SANSKRIT

PAPER—SAN-303

*Full Marks* : 40

*Time* : 2 hours

Answer **all** questions

*The figures in the right-hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

सर्वे प्रश्नाः सुरगिरा देवनागर्या च समाधेयाः

1. (क) यथेच्छं प्रश्नद्वयं समाधेयम् — 2 × 2

(*i*) 'दशरूपकम्' — इति ग्रन्थस्य टीकाकारः कः ? का नाम तस्य टीकायाः ?

( *Turn Over* )

(*ii*) 'नमस्तस्मै गणेशाय यत्कण्ठः पुष्करायते ।
मदाभोगधनध्वानो नीलकण्ठस्य ताण्डवे ॥'

— इति मङ्गलाचरणश्लोके कुत्र श्लेषालङ्कारस्य आक्षेपः दृष्टः ?

(*iii*) रूपकं कतिविधम् ?

(*iv*) नृत्यस्य प्रकारभेदः कः ?

(ख) यथेच्छं प्रश्नद्वयं समाधेयम् — 2 × 2

(*i*) 'ध्वन्यालोकः' — इति ग्रन्थस्य ग्रन्थकारः कः ? ग्रन्थे कति कारिकाः सन्ति ?

(*ii*) 'समाम्नातपूर्वः' — इति पदस्य समासं निर्णयतु । 'तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरूपम्' — इत्यत्र तत्पदेन किं व्यपदिश्यते ?

(*iii*) ब्रज ममैवैकस्या भवन्तु निःश्वासरोदितव्यानि ।
मा तवापि तया विनादाक्षिण्यहतस्य जनिषत ॥

— इति कस्मिन् प्रसङ्गे उल्लिखितमानन्दवर्धनाचार्येण ?

(*iv*) यत्नतः कौ प्रत्यभिज्ञेयौ ? कथं वा ?

2. प्रत्येकविभागात् कयोश्चिद् द्वयोर्व्याख्या कार्या —

**विभागः — 'क'**

(*i*) दशरूपानुकारेण यस्य माद्यन्ति भावकाः ।
नमः सर्वविदे तस्मै विष्णवे भरताय च ।।

(*ii*) अवस्थानुकृतिर्नाट्यम् ।

(*iii*) उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः ।

(*iv*) भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः । 2 × 4

**विभागः — 'ख'**

(*i*) प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ।।

(*ii*) यथा पदार्थद्वारेण वाक्यार्थः सम्प्रतीयते ।
वाच्यार्थपूर्विका तद्वत्प्रतिपत्तस्य वस्तुनः ।।

(*iii*) सरस्वती स्वादुतदर्थवस्तु निःस्यन्दमाना महतां कवीनाम् ।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम् ।।

(*iv*) वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता ।
व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कतम् ।। 2 × 4

**3.** प्रश्नद्वयस्योत्तरं प्रदेयम् — 8 × 2

(क) किं नाम वस्तु ? कतिविधं च तत् ? धनञ्जयमतानुसारं तत्स्वरूपं व्याख्यायताम् ।

*अथवा*

सन्धेः सामान्यं लक्षणमुल्लिख्यताम् । कति सन्धयः सन्ति ? धनञ्जयमतानुसारं मुखसन्धिस्वरूपं व्याख्यायताम् ।

(ख) 'तस्याभावं जगदुरपरे' — इति मतं व्याख्यायताम् । तन्मतमानन्दवर्धनाचार्येण कथं खण्डितम् ?

*अथवा*

आनन्दवर्धनाचार्येण ध्वनेः किं लक्षणं लक्षितम् ? तस्य च लक्षणस्य प्रतिपदव्यावृत्तिपूर्वकं व्याख्या कार्या ।

---